# ॥ श्री राधा कृपा कटाक्ष स्तोत्र ॥

## ॥ श्री राधे राधे ॥

# Full Disclaimer

*This book is for educational, inspirational, and cultural purposes only. The remedies, rituals, affirmations, breathing methods, and spiritual practices described are based on traditional beliefs, historical customs, and personal development principles. They are not guaranteed solutions.*

*This book does not replace advice from licensed doctors, psychologists, financial advisors, lawyers, or other qualified professionals. If you have medical symptoms, mental health concerns, legal matters, or financial risk, seek professional help.*

*Use all remedies responsibly, ethically, peacefully, and according to local law. Do not use fire, herbs, fasting, incense, or physical practices in unsafe ways. The author and publisher are not liable for misuse.*

*Results in life depend on effort, discipline, timing, environment, skill, and many other factors. No spiritual method guarantees money, marriage, success, healing, or protection.*

Hargharpanditji
"PUJA ON YOUR SCREEN, BLESSINGS AT YOUR DOOR"

# ॥ श्री राधा कृपा कटाक्ष स्तोत्र ॥

## ॥ मूल स्तोत्र ॥

मुनीन्द्रवृन्दवन्दिते त्रिलोकशोकहारिणि।
प्रसन्नवक्त्रपङ्कजे निकुञ्जभूविलासिनि।
व्रजेन्द्रभानुनन्दिनि व्रजेन्द्रसूनुसङ्गते।
कदा करिष्यसीह मां कृपाकटाक्षभाजनम् ॥१॥

अशोकवृक्षवल्लरीवितानमण्डपस्थिते।
प्रवालज्वालपल्लवप्रभारुणाङ्घ्रिकोमले।
वराभयस्फुरत्करे प्रभूतसम्पदालये।
कदा करिष्यसीह मां कृपाकटाक्षभाजनम् ॥२॥

अनङ्गरङ्गमङ्गलप्रसङ्गभङ्गुरभ्रुवाम्।
सविभ्रमं ससम्भ्रमं दृगन्तबाणपातनैः।
निरन्तरं वशीकृतप्रतीतनन्दनन्दने।
कदा करिष्यसीह मां कृपाकटाक्षभाजनम् ॥३॥

तडित्सुवर्णचम्पकप्रदीप्तगौरविग्रहे।
मुखप्रभापरास्तकोटिशारदेन्दुमण्डले।
विचित्रचित्रसञ्चरच्चकोरशावलोचने।
कदा करिष्यसीह मां कृपाकटाक्षभाजनम् ॥४॥

मदोन्मदातियौवने प्रमोदमन्मथाङ्किते।
प्रियानुरागरञ्जिते कलाविलासपण्डिते।
अनन्यधन्यकुञ्जराज्यकामकेलिकोविदे।
कदा करिष्यसीह मां कृपाकटाक्षभाजनम् ॥५॥

अशेषहावभावधीरहीरहारभूषिते ।
प्रभूतशातकुम्भकुम्भकुम्भसिुस्तनी ।
प्रशस्तमन्दहास्यचूर्णपूर्णसौख्यसागरे ।
कदा करिष्यसीह मां कृपाकटाक्षभाजनम् ॥६॥

मृणालबालवल्लरीतरङ्गरङ्गदोर्लते ।
लताग्रलास्यलोलनीललोचनावलोकने ।
ललल्लुलन्मलिन्मनोज्ञमुग्धमोहनाश्रिते ।
कदा करिष्यसीह मां कृपाकटाक्षभाजनम् ॥७॥

सुवर्णमालिकाञ्चितत्ररिखकम्बुकण्ठगे ।
त्रसूित्रमङ्गलीगुणत्ररित्नदीप्तदिीधते ।
सलोलनीलकुन्तले प्रसूनगुच्छगुम्फिते ।
कदा करिष्यसीह मां कृपाकटाक्षभाजनम् ॥८॥

नतिम्बबम्बिलम्बमानपुष्पमेखलागुणे ।
प्रशस्तरत्नकङ्किणीकलापमध्यमञ्जुले ।
करीन्द्रशुण्डदण्डकिावरोहसौभगोरुके ।
कदा करिष्यसीह मां कृपाकटाक्षभाजनम् ॥९॥

अनेकमन्त्रनादमञ्जुनूपुरारवस्खलत् ।
समाजराजहंसवंशनक्विणातगिौरवे ।
वलिोलहेमवल्लरीवडिम्बचिारुचङ्क्रमे ।
कदा करिष्यसीह मां कृपाकटाक्षभाजनम् ॥१०॥

अनन्तकोटविष्णुिलोकनम्रपद्मजार्चति ।
हमािद्रजािपुलोमजावरिञ्चिजावरप्रदे ।
अपारसद्धिवृद्धदिग्धिसत्पदाङ्गुलीनखे ।
कदा करिष्यसीह मां कृपाकटाक्षभाजनम् ॥११॥

मखेश्वरि क्रियेश्वरि स्वधेश्वरि सुरेश्वरि।
त्रिवेदभारतीश्वरि प्रमाणशासनेश्वरि।
रमेश्वरि क्षमेश्वरि प्रमोदकाननेश्वरि।
व्रजेश्वरि व्रजाधिपे श्रीराधिके नमोऽस्तु ते ॥१२॥

इतीदमद्भुतं स्तवं निशम्य भानुनन्दिनी ।
करोतु सन्ततं जनं कृपाकटाक्षभाजनम् ।
भवेत्तदैव सञ्चितत्रिरूपकर्मनाशनम् ।
लभेत्तदा व्रजेन्द्रसूनुमण्डलप्रवेशनम् ॥१३॥

## ॥ फलश्रुति ॥

राकायां च सिताष्टम्यां दशम्यां च विशुद्धधीः ।
एकादश्यां त्रयोदश्यां यः पठेत्साधकः सुधीः ॥१४॥

यं यं कामयते कामं तं तमाप्नोति साधकः ।
राधाकृपाकटाक्षेण भक्तिः स्यात् प्रेमलक्षणा ॥१५॥

ऊरुदघ्ने नाभिदघ्ने हृद्दघ्ने कण्ठदघ्नके ।
राधाकुण्डजले स्थित्वा यः पठेत् साधकः शतम् ॥१६॥

तस्य सर्वार्थसिद्धिः स्याद् वाक्सामर्थ्यं तथा लभेत् ।
ऐश्वर्यं च लभेत् साक्षाद् दृशा पश्यति राधिकाम् ॥१७॥

तेन स तत्क्षणादेव तुष्टा दत्ते महावरम् ।
येन पश्यति नेत्राभ्यां तत्प्रियं श्यामसुन्दरम् ॥१८॥

नित्यलीलाप्रवेशं च ददाति श्रीव्रजाधिपः ।
अतः परतरं प्रार्थ्यं वैष्णवस्य न विद्यते ॥१९॥

**॥ इति श्रीमदूर्ध्वाम्नाये श्रीराधिकायाः कृपाकटाक्षस्तोत्रं सम्पूर्णम् ॥**